ङणनान्ते तथैव स्यात्२५ पान्ते२६ त्वङ्गुलिपीडनम्॥११॥
ऊर्द्ध्वक्षेपापि२७ या मात्रा अधः क्षेपापि या भवेत् ।
एकैकामुत्सृजेद्धीरः प्रचिते तूभयं२८ तथा ॥ १२ ॥ २९
ह्रस्वानुस्वारकरणे त्वङ्गुष्ठाग्रप्रकुञ्चनम् ।
दीर्घे तु सूरयः प्राहुः प्रादेशिन्याः प्रसारणम्३० ॥१३॥३१
पदान्तरं न कुर्वीत३२ संहितायां प्रयोगवित् ।
मांसे३३ मांसं३४ विजानीयात् पांसे३५पांसं विनिर्दिशेत् ।१४

---

१५. ग, प्रयोगेण । प, सम्यक्वर्णः प्र० । १६. तुल० ना० २ । ८ । ३१ ॥ १७. ग, पठं । १८. का, द, पार्ष्णिहिता । प, पाणिर्हिता । ग, पाणिर्हता । देखो इस श्लोक पर प्रो० कीलहार्न का लेख, इण्डियन अण्टीक्वेरी, भाग ५, सन् १८७६, पृ० १४१ । प्रो० कीलहार्न की कल्पना ठीक है । १९. तुल० ना० २ । ८ । १५, १७ ॥ २०. ग, ० रान्तं । २१. का, रान्ते । २२. का, प्रयोजयेत् । प,ग, निवेशयेत् । २३. तुल० या० १ । ५४ ॥ २४. ग, कंठान्तयोस्तु । २५. का, प, तथैवास्यात् । २६. प, प्रान्ते । २७. का, क्षेपाश्च । २८. ग, नूभयं । २९. तुल० या० १ । ५८ ॥ ३०. का, देशिन्याः सुप्रसारणम् । ३१. तुल० या० १ । ५९ ॥ ३२. ग, कुर्वेत । ३३. का, नैव । ३४. प, मांसे । ग, मांस । ३५. का, प, पांसेन् । ग, पासं ।

यथा नौ स्रोतसां३६ मध्ये समं गच्छति संयुता ।
तैलधारेव वा वक्त्रं३७ तद्वद्वर्णान्प्रयोजयेत् ॥१५॥४॥

(५)

उदात्ताच्च न कर्त्तव्यमुदात्तं स्वरितं तथा ।
नीचान्नीचतरन्नास्त्युच्चादुच्चं न विद्यते ॥ १ ॥
उच्चादुच्चतरन्नास्ति नीचान्नीचतरं कुतः ।१
स्वरितात्स्वरितन्नास्ति कम्पिताच्चैव कम्पितम् ।
यदुदात्तमुदात्तं तद्यत्स्वरितं तत्पदे भवति नीचम् ॥ २ ॥२
यन्नीचं नीचमेव तद्यत्प्रचयस्थं तदपि नीचम् ॥ ३ ॥२
स्वरितानां३ मनह्लादमुदात्तानामताडनम् ।
अनुदात्तमनाधिष्ठं४ शषसानामरोमशम् ॥ ४ ॥
षड्धातुस्वरितादेशे५ उदात्तश्च५ चतुर्विधः ।
द्विविधश्चानुदात्तश्चैतच्छास्त्रेण चोदितम्६ ॥ ५ ॥
स्वरित्प्रभवं७ प्रचितात्स्वरितं८ विद्यत९ उदात्तं वा ।
अनुदात्तमेव तद्विद्याद्यद्दतं१० च तद्विद्धि यत्प्रचितम् ॥ ६ ॥
स्वरितात्पराणि यानि स्युरनुदात्तानि११ कानिचित्११ ।
सर्वाणि प्रचयं यान्ति१२ ह्युपोदात्तं न विद्यते ॥ ७ ॥१३

---

३६. द, प, श्रोतसां । ३७. का, वाणी ।

१. तु० या० २ । २७ ॥ ना० १ । ८ । ६ ॥ २. ना० २ । ३ । १ ॥
३. अनुदात्त । ४. प, ०धिष्ठं । ५. क, ०देवह्युदा० । ६. का, ०त्तश्च ह्येतच्छा ०चोदितम् । ७. प, इस के आगे प्रचितं देता है । ८. का, ०तमेव । ९. का, नास्ति । १०. का, द्यादतं । ११. का, ०त्तान्युदात्तवत् । १२. प, यातु । १३. तु० ना० २ । ७ । ८ ॥

स्वरितावधृत१४ उदात्ते परस्त्रिपूर्वो विक्रमोच्युते ।
स्वरितावधृत१५ उदात्ते१५ पादः स्यात्स हि विक्रमः ॥८॥
ननु धारयेद् धृतमुपस्पर्शमुपोदात्तम्१६ निपातयेत् ।
एकाक्षरे१७ पतनं१८ न१८ च धृतमुच्चारयेत्स्वरे वापि ॥९॥
न्यासमेवादितः कुर्यान्नीयतेषु बहुष्वपि ।
शेषमाद्यवदुक्त्वा तु तत्पदेषु समेषु च ॥ १० ॥
स्वर उच्चः स्वरो नीचः स्वरः स्वरित उच्यते ।
व्यञ्जनान्यनुवर्त्तन्ते यत्रासौ तिष्ठति स्वरः ॥ ११ ॥१९॥५॥

(६)

स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव तु ।
स्वरप्रधानं त्रैस्वर्य्यमाहुरक्षरचिन्तकाः ॥ १ ॥१
द्वयोस्तु स्वरयोः सन्धावेकीभावो यदा भवेत् ।२
उदात्तोऽथनुदात्तस्य३ वशं गच्छति सन्धिषु ॥ २ ॥
दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः ।
स्वरो व्यञ्जनमासाद्य हरते नात्र संशयः ॥ ३ ॥४
आख्यातानां प्रयोगेषु पूर्वस्वरमुपस्थितम्५ ।
षोडशाक्षरमर्यादं यद्योगे स्वरमुद्धरेत् ॥ ४ ॥

---

१४. प, ०तावद्धृत । इसके आगे उद्धत अथवा उद्धृत अधिक है । १५. प, ०द्धृतोदात्ते । १६. का, वृतमु० ॥ १७. प, च अधिक है ॥ १८. का, धारयेन्न ॥ १९. तु० या० २, २८, २९ ॥ ना० २ । ५ । १ ॥

१. तु० या० २ । २९ ॥ ना० २ । ५ । २ ॥ २. तु० या० २ । ८ ॥ ३. का, ऽप्यनुदा० ॥ ४. तु० या० २ । २६ ॥ ना० २ । ५ । ३॥ ५. प, पूर्वपदमु० ॥

नीचं तु स्वरपूर्वं तु नीचावग्रहमेव च।
हन्तव्यं तद्विजानीयादुच्चावग्रहवर्जितम् ॥ ५ ॥
नातिहन्न्यान्न निर्हन्यान्न६ प्रगायेन्न कम्पयेत् ।७
एतौ द्वौ युगपत्साध्यावेतच्छास्त्रेण चोदितम् ॥ ६ ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥ ७ ॥८
वर्णानां तु प्रयोगेषु करणं स्याच्चतुर्विधम्।
संवृतं विवृतं चैव स्पृष्टमस्पृष्टमेव च ॥ ८ ॥
स्पर्शानां कारणं स्पृष्टमन्तस्थानामतो ऽन्यथा।
यमानां संवृतं९ प्राहुर्विवृतं च स्वरोष्मणाम्१० ॥ ९ ॥

(७)

सप्तस्वरान् प्रवक्ष्यामि तेषां चैव बलाबलम्।
लक्षणानि च सर्वेषां युक्तस्तानि१ निबोध मे१ ॥ १ ॥२
अभिनिहितः प्राक्श्लिष्टो३ जात्यः क्षैप्रश्च पादवृत्तश्च।
तैरोव्यञ्जनः षष्ठस्तिरोविरामश्च सप्तमः ॥ २ ॥२
ए ओ आभ्यामुदात्ताभ्यामकारो रेफितश्च यः।
अकारं यत्र लुम्पन्ति तमभिनिहितं विदुः ॥ ३ ॥४
इकारं५ यत्र पश्येयुरिकारेणैव संयुतम्।

६. का, नाभि० ॥ ७. तु० ना० १।६।१५ ॥ ८. तु० या० २।११ ॥
९. का, स्वरितम् ॥ १०. का, त्रिरो० ॥

१. ग, युक्तस्थानानि बोधत ॥ २. तु० या० १।७१, ७२ ॥
ना० १।८।५, १० ॥ ३. का, प्राश्लिष्टः ॥ ४. तु० या० १।७३ ॥
ना० २।१।३ ॥ ५. द, ईकारं; ग, इकारो ॥

उदात्तो ऽप्यनुदात्तस्य प्राक्श्लिष्टो३ ऽभीन्धतामपि ॥४॥६
सयकारं समं७ वाऽप्यक्षरं स्वरितं भवेत् ।
न चोदात्तं पुरस्तात्स्याज्जात्यः८ स्वर्दृश्य एव तु ॥ ५ ॥९
इ१० उ१० वर्णौ यदोदात्तावापद्येते यवौ क्वचित् ।
अनुदात्तप्रत्यये११ स्याद्विद्धि क्षैप्रस्य लक्षणम् ॥ ६ ॥१२
स्वरिते स्वरितं यत्र विवृत्या१३ यत्र संहिताः१४ ।
तं पादवृत्तं जानीयात्ते त्वस्मिन्यवमादधुः ॥ ७ ॥१५
उदात्तपूर्वे सार्द्धे१६ तु द्वितीये अक्षरे१७ तु यः ।
तैरोव्यञ्जन इत्येष सारः१८ स्याद्दधिमाध्विति१९ ॥ ८ ॥२०
अवग्रहात्परं यत्र स्वरितं स्यादनन्तरम् ।
तिरोविरामं जानीयात् प्रजापतेर्निदर्शनम् ॥ ९ ॥२१
द्वयोरुदात्तयोर्मध्ये नीचो२२ यस्स्यादवग्रहः२२ ।
ताथाभाव्यो२३ भवेत्कम्पस्तनूनपान्निदर्शनम् ॥ १० ॥२४

६. तु० या० १ । ७५ ॥ ना० २ । १ । ६ ॥ ७. का, द, सवं; ग, संव; प, समं व्याप्यक्षरं ॥ ८. का,पुरस्तस्य जात्यः । प, पुरस्तास्या जात्य० ॥ ९. तु० या० १ । ७३ ॥ ना० २।१।१ ॥ १०. द, ई ऊ ॥ ११. द, अनुदात्तः प्रत्ययः ॥ १२. या० १ । ७४ ॥ ना० २ । १ । २ ॥ १३. का, विवृत्यां ॥ १४. का, ग, संहिता ॥ १५. या० १ । ७८ ॥ ना० २ । १ । ७ ॥ १६. प, स्वार्ये । ग, सार्ये ॥ १७. ग, अक्षये ॥ १८. प, ग, सार ॥ १९. प, ०मध्वांति ॥ २०. तु० या० १ । ७६ ॥ ना० २ । १ । ४ ॥ २१. तु० या० १ । ७७ ॥ ना० २ । १ । ५ ॥ २२. का, नीचोऽस्ति यदवग्रहः । प, द, ग, ०यस्यात् ॥ २३. प, ग, तथाभाव्यः ॥ २४. तु० या० १ । ७८ ॥

(८)

ताथाभाव्यस्तु१ तालव्यो न कम्पः स्वरसञ्ज्ञकः।
स तालव्यो भवेत्कम्प एजातीति२ निदर्शनम् ॥ १ ॥
सर्वतीक्ष्णोऽभिनिहितस्ततः प्राक्श्लिष्ट३ उच्यते।
ततो मृदुतरौ स्वारौ४ जात्यः५ क्षैप्रश्च तावुभौ ॥ २ ॥
ततो मृदुतरः६ स्वारस्तैरोव्यञ्जन७ उच्यते।
पादवृत्तो मृदुतर इति स्वारबलाबलम् ॥ ३ ॥
उपन्यासस्तु कर्त्तव्यः कण्ठे निक्षेपसञ्ज्ञकः८।
उपन्यासात्परं हन्याद्भूमौ शङ्कुपदं यथा ॥ ४ ॥
प्राक्श्लिष्ट९ जात्यक्षैप्राणान्१० यश्चाभिनिहितश्च यः।
उदात्तोपस्थिते११ तेषामेकदेशं प्रकम्पयेत्१२ ॥ ५ ॥
हलन्तादुत्तरो यस्तु पदादवग्रहेषु च।
मिश्रस्तस्याद्य१३ इत्येषो१४ योऽन्यः स य इति स्मृतः ॥६॥
पादादौ च पदादौ च संयोगावग्रहेषु च।
यः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः ॥ ७ ॥१५
पुनरन्तश्च सवितश्च प्रातर्या रेफिता च संहिता यत्र।

---

१. का, प, ग, तथा० ॥ २. का, एजतीति । ग, एजातोति ॥ ३. का, प्राश्लिष्ट ॥ ४. का, चैव ॥ ५. प, ग, जात्य ॥ ६. प, द, मृदुतर ॥ ७. प, ०तौरो० ॥ ८. प, संक्षिकः ॥ ९. का, द, प्राश्लिष्ट ॥ १०. का, जात्यक्षैप्राश्रयश्चाभि० ॥ ११. द, ०स्थितो ॥ १२. का, प्रकल्पयेत् । प, प्रकंपयेत् ॥ १३. का, यस्य स्वस्माद्य। द, ग, मिश्रस्वस्याद्य ॥ १४. द, इत्येको ॥ १५. तु० या० २ । ५९ ॥ ना० २।२।१६ ॥

रेफवन्ति पदान्यत्र[१६] रेफे[१७] तद्रेफितं[१८] पदम् ॥ ८ ॥
अन्तः[१९] शब्दस्तु यः कश्चिदाद्युदात्तो भवेद्यदि ।
न तत्र रेफमिच्छन्ति संहितायां पदेषु च ॥ ९ ॥
अनुस्वारं हि दोषस्तु हकारादिषु वर्जितः ।
अंहोमुचो वातरंहा दँहश्चेति निदर्शनम् ॥ १० ॥
अनुस्वारास्तु[२०] कर्त्तव्या ह्रस्वदीर्घप्लुतास्त्रयः ।
अयँ राजा पशोर्मांसं क्षत्रियाणां धनूँषि च ॥ ११ ॥

(६)

विवृत्तयस्तु[१] विज्ञेयाश्चतस्रस्त्वनुपूर्वशः ।
नामभिस्तु पृथग्ज्ञेयास्तासां[२] वक्ष्यामि लक्षणम् ॥ १ ॥[३]
पिपीलिका पाकवती तथा वत्सानुसारिणी ।
अनुसृतवत्सा चैव चतस्रो हि विवृत्तयः ॥ २ ॥[४]
वत्सानुसृता ह्रस्वा जघने वत्सानुसारिणी चाग्रे ।
पाकवती चोभयतः पिपीलिकमध्याप्युभयदीर्घा[५] ॥ ३ ॥[६]
पूर्वं ह्रस्वं परं दीर्घमक्षरं यत्र दृश्यते ।
सा वत्सानुसृता ज्ञेया व्यत्यासेत्यनुसारिणी[७] ॥ ४ ॥
उभाभ्यामेव ह्रस्वाभ्या यवमध्यां विनिर्दिशेत् ।

---

१६. का, पदान्यस्य ॥ १७. का, स्याद्धै । ग, रेफ ॥ १८. का, प, ताद्रिफितं । ग, तद्रैफितं ॥ १९. ग, अन्त ॥ २०. का, ०राश्च ॥

१. का, ०यश्च ॥ २. प, द, ग, पृथक्क्षेया० ॥ ३. तु० ना० २ । ४ । १ ॥ ४. तु० या० २ । ९ ॥ ५. प, ०मध्याथुभय । ग, पिपीलिकामध्या० ॥ ६. तु० या० २।११ ॥ ना० २।४।२ ॥ ७. द, ०सेत्वनु० ॥

ताभ्यामेव तु दीर्घाभ्यां विज्ञेया सा पिपीलिका ॥ ५ ॥
अभ्रमध्ये यथा विद्युद्दृश्यते मणिसूत्रवत् ।
एषच्छेदो विवृत्तीनां यथा बालेषु[८] कर्त्तरि[९] ॥ ६ ॥[१०]
आपद्यते मकारो यरवोष्मसु[११] प्रत्ययेष्वनुस्वारम् ।[१२]
न भवति लकारे परसवर्णः स्पर्शेषु चोत्तमापत्तिः ॥ ७ ॥
ऊष्मस्थौ यत्र दृश्येते स्वरवर्णौ स्वरोदयौ ।
ऋलृवर्णौ तथा ज्ञेयौ स्वरभक्तीति संस्थितौ ॥ ८ ॥
तां ह्रस्वां प्रतिजानीयाद्यथा मात्रा भवेद्यदि ।
सम्यगेनां विजानीयाद्[१३] द्वौ दोषौ परिवर्जयेत् ॥ ९ ॥
सम्यगेनां यदा पश्येच्छतबलिशेति[१४] निदर्शनम् ।
अकारं चाप्युकारं च विच्छिन्नं विवृतं तथा ॥ १० ॥
करिणी कर्विणी[१५] चैव हरिणी हारितेति च ।[१६]
तथा हंसपदा नाम पंचताः स्वरभक्तयः ॥ ११ ॥[१७]
करिणीं रहयोर्विद्यात्कर्विणीं लहकारयोः ।

---

८. प, कालेषु ॥ ९. का, ग, कर्त्तरी । द, में ०रि ०पाठ है । यहां (दीर्घ) ईकार का चिन्ह पतली मसी में पीछे से दिया गया है ॥ १०. तु० या० २ । ७ ॥ ना० १ । ६ । ११ ॥ ११. प, यरावाष्मस्तु । यह पुरानी लेखविधि के अनुसार यरवोष्मस्तु बनेगा ॥ १२. तु० ना० २ । ४ । ४ ॥ १३. प, द, ग, विजानीया ॥ १४. प, द, ०छतबलशेति । ग, छतवल्शेति ॥ १५. प, करिणीं ॥ १६. का, करिणीं कुर्विणीं चैव हारिणीं लहकारयोः ॥ १७. तु० या० २ । १३ ॥ का, में ११वें श्लोक का उत्तरार्द्ध और १२वें का पूर्वार्द्ध नहीं है ॥

हरिणीं१८ रषयोर्विद्याद्धारितां१६ लशकारयोः ॥ १२ ॥२०
या तु हंसपदा नाम सा तु रेफषकारयोः ।२१
या तु रेफशकारी स्यात्काकिनीं तां विनिर्दिशेत् ॥ १३ ॥ ६ ॥

(१०)

ऋकारप्रत्ययो रेफः संयुक्तः शषसैः सह ।
आद्यस्तत्र क्रमो ज्ञेयो न परो बोधितो बुधैः ॥ १ ॥
रेफोष्मणां संयोगे स्वरभक्तिरक्रमश्चैत्र ।
तत्रोदाहरणानि प्रदर्शनं वर्षबर्हिश्च१ ॥ २ ॥
रेफं स्वरोदये विद्याद्दकार२ व्यञ्जनोदये ।
स्वरव्यञ्जनयोर्मध्ये रेफमेव विनिर्दिशेत् ॥ ३ ॥
ओभावश्च विवृत्तिश्च शषसा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ ४ ॥३
यद्योभाव प्रसंधानमुकारादि परं पदम् ।
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ ५ ॥४
षत्वणत्वमुपाचारो दीर्घीभावस्तथैव च ।
यस्मिन् पदे निपद्यन्ते तत्समासाद्य५ लक्षणम् ॥ ६ ॥६
नकारान्ते पदे पूर्वे स्वरे च पर संस्थिते७ ।

---

१८. का, हरिणी ॥ १६. का ऋष० ॥ २०. तु० या० २ । १४ ॥
२१. तु० या० २ । १५ ॥

१. का वर्षोबर्हिश्च । प, वर्षबर्हिषश्च । ग, वार्षाबाहिषश्च ॥
२. प, ग, विद्याद्दकारं ॥ ३. तु० या० २ । ५३ ॥ ना० २ । ५ । ४ ॥
४. तु० या० २ । ५४ ॥ ना० २ । ५ । ६ ॥ ५. प, ग, तत्समापाद्य ॥
६. का में ६ठा श्लोक पहले और ५वां पीछे है ॥ ७. ग, पद्सं० ॥

रङ्गं वर्णं विजानीयान्न ग्रसेत्पूर्वमक्षरम् ॥ ७ ॥८

रङ्गं वर्णं यदा पश्येद्द्विवृत्त्या सह संस्थितम् ।
व्यञ्जनान्तं विजानीयाद्भ्रोमाँ९ इति निदर्शनम् ॥ ८ ॥

यथा सौराष्ट्रिका नारी अरॉं१० इत्यभिभाषते ।
एवं रङ्गाः प्रयोक्तव्या ङकारपरिवर्जिताः ॥ ९ ॥११

नासादुत्पद्यते रङ्गः कांसेन१२ समनिस्वनः१३ ।
मृदुश्चैव१४ द्विमात्रं स्याद् वृष्टिमाँ इति निदर्शनम् ॥१०॥१५

संयुक्तस्य तु यत्पूर्वं तद्ध्रस्वंलघुं१६ विजानीयात् ।
तत्संयोगोत्तरं विद्याद् गुर्वन्यत्र१७ नियोगतः ॥११॥१०॥

(११)

मात्रैकं१ लघु विज्ञेयं तत्संयोगपरं गुरुम् ।
सपरं२ व्यञ्जनान्तं च३दीर्घस्तु प्लुत एव च ॥ १ ॥

स्पर्शानामुत्तमैः स्पर्शैः संयोगाश्चेदनुक्रमात्४ ।
आनुपूर्व्या यमांस्तत्र५ जानीयाच्चतुरस्तथा ॥ २ ॥

रुक्मेति प्रथमं विद्यान्नृचेत्यपरं६ विदुः ।
तृतीयं पद्ममित्याहुः शंखध्ममिति७ चोत्तमम्७ ॥ ३ ॥

---

८. तु० ना० २ । ४ । ५ ॥ ९. द, ०द्भ्रोमँ । ग, ०द्रोमां ॥ १० द, ग, अरँ ॥ ११. तु० या० २ । ९७ ॥ ना० २ । ४ । ६ ॥ १२. का, कंसेन ॥ १३. ग, स्वरः ॥ १४. का, मृदुं चैव ॥ १५. तु० या० २ । १०१ ॥ ना० २ । ४ । ८ ॥ १६. का, तद्ह्रस्वं । प, तस्वं । द, ग, तध्रास्वं ॥ १७. द, ग, गुर्वैन्यत्र । का, कुर्वेन्त्यत्र ॥

१. प, मात्रकं । ग, मातृकं ॥ २. का, मपरं ॥ ३. प, स्थ ॥ ४. का, संयोगाच्चेद० ॥ ५. प, द, ग, यमास्तत्र ॥ ६. ग, देसरमं ॥ ७. का, शङ्ध्नमिति० । प, शंखद्धयमीति० । ग, शंखध्मति चोदितं ॥

वर्गान्ताः श ष स प्रथमाः संयुक्ता यदा स्युरभिधेयाः ।
लघुशास्त्रदोषतत्त्वज्ञैर्यमदोषास्तथा हि परिहार्याः ॥ ४ ॥८

वर्गान्ता यत्र दृश्यन्ते शषसैः सह संयुताः ।
यमास्तत्र निवर्त्तन्ते श्मशानादिव बान्धवाः ॥ ५ ॥९

संयोगस्य परं स्वार्यं१० परं संयोगनायकम् ।
संयुक्तस्य तु वर्णस्य न११ स्वरं पूर्वमिष्यते ॥ ६ ॥१२

स्वरणं१३ पतनं१४ चैव१५ वोत्थानेषु१६ समेषु च ।
एवमेव१७ पदे दृष्टं न पूर्वाङ्गे क्वचिद्भवेत् ॥ ७ ॥

दारुसङ्घातवत्श्लिष्टं१८ संयोगवशवर्त्तिनाम् ।
वर्णानां युगसम्पन्नमेकं वर्णमिवोत्सृजेत् ॥ ८ ॥

वर्णा१९ विंशतिरेकश्च येषां द्विर्भाव इष्यते२० ।
प्रथमा मध्यमा चान्त्या यवलाः२१ श ष सास्तथा ॥ ९ ॥

न रेफे वा हकारे वा द्विर्भावो जायते क्वचित् ।
न च वर्गद्वितीयेषु न चतुर्थे कदाचन ॥ १० ॥२२

चतुर्थं तु तृतीयेन द्वितीयं प्रथमेन तु ।
आद्यमन्त्यं तृतीयं च स्वाक्षरेणैव२३ पीडयेत् ॥ ११ ॥२४

---

८. का में लुप्त ॥ ९. तु० या० २। ११४ ॥ ना० २। २। ९ ॥ १०. प, सवार्यं। द, ह्वार्यं। ग, कार्यं। ११. ग, तत् ॥ १२. तु० या० २। २२ ॥ ना० २। २। १४ ॥ १३. प, ग, स्मरणं ॥ १४. ग, पवनं ॥ १५. प, द, ग, चै ॥ १६. द, वोत्क्षातेषु। ग, वोक्षवातेषु ॥ १७. का, एकमेव ॥ १८. द, ०वाक्लिष्टं। प, ०धाटवच्छ्लिष्टं ॥ १९. ग, वर्णं ॥ २०. ग, उच्यते ॥ २१. का, ग, यलवाः। प, द, यरलवाः। द में इसे काट कर हाशिये पर उसी हाथ से "यवलाः इति पाठः" लिखा है ॥ २२. तु० ना० २।२।६ ॥ २३. प, साक्षरणैव ॥ २४. तु० या० २। १२२। ना० २२। २। ७ ॥

(१२)

दृप्सो[१] ऽप्सरायामपृशब्दे[२] विश्वप्स्न्या च[३] विरॅप्शिने ।
काश्यपो ऽभिनिधानानामागमं[४] प्रतिषेधते ॥ १ ॥

यत्र चोभयतः स्पर्शाः संयुक्ताः शषसैः सह ।
आद्यस्तत्र क्रमो ज्ञेयो न परो बोधितो बुधैः ॥ २ ॥

ऋवर्णरेफसंयुक्तं स्वरितं स्यादनन्तरम् ।
ऋकार रेफसंयुक्तं यत्पूर्वं व्यञ्जनोदये[५] ॥ ३ ॥

ऋकारे लघु तद्विद्याद्रेफे तद्गुरुसंज्ञकम्[६] ।
न क्रमते स्वरयमयोर्न च वर्गसवर्णयोर्न च विरामे ॥ ४ ॥

न च रेफानुस्वारे विसर्जनीये तु सर्वत्र ।
ब्रुवन् भ्रुवौकर्णललाटनासिका,
न कम्पयेदोष्ठचलुर्न निर्भुजेत् ।
मुखं न विक्लिश्य न नम्रवक्त्रजो,
न चापि संदष्टहनुर्न बाह्यवाक् ॥ ५ ॥

न रुद्वाक्[७] स्यान्न च उत्स्वरं[८] वदेत्,
न चानिमेषो न च गर्वमाचरेत् ।
गजन्यवेषी बलवानतन्द्रितो,
व्यपेतरोष श्रमशोकहर्षभीः ॥ ६ ॥

---

१. का, दृप्सौ । ग, द्रप्सो ॥ २. का, ऽप्सरायामशब्दे । प, प्सरायामत्शब्दे । ग, प्सराभ्यामपृशब्दे ॥ ३. का, ०त्र ॥ ४. का, ऽभिनिघातानां० ॥ ५. का, ०दयेत् ॥ ६. प, द, ०संज्ञिकम् ॥ ७. प, द, रुद्य० ॥ ८. ग, चंडस्वरं ॥

न चानुकूजेत्पदमादितो९ ब्रुवन्,
न नासिका नित्यमनुष्ठितं वदेत् ।
न चापदान्ते श्रमपीडितः श्वसेन्,
न चोच्छ्वसेदुक्तपदोऽप्यभीक्ष्णशः१० ॥ ७ ॥
नातिनिष्पीडयेद्वर्णान्न चाव्यक्तानुदाहरेत् ।
समान्श्लक्ष्णानसंदिग्धान् वर्णानुच्चारयेद्बुधः ॥ ८ ॥
प्रथमानूष्मसम्पन्नान्द्वितीयानिव दर्शयेत् ।
तथैतान् प्रतिजानीयाद्यथा मत्स्यान् क्षुरोऽप्सरान्११॥९॥१२
तथैव पञ्चमानाहुरागमो यत्र१३ दृश्यते ।
द्वितीयानेव तान्कुर्याद् यस्मिन्सीतेति निदर्शनम् ॥१०॥१४

(१३)

अक्ष्णोर्निमेषमात्रेण यो वर्णः समुदीर्यते ।
स एक मात्रो द्विस्तावान्१ दीर्घस्तु प्लुत उच्यते ॥ १ ॥
अवग्रहे ऽर्द्धमात्रं२ स्यात्कालो मात्रा पदान्तरे ।

---

९. ग, चातिकुजेसत्दमा०॥ १०. ग, ०भीक्षशः॥ ११. का,ग, क्षरोप्सरान् ॥ १२. तु० ना० २ । ५ । ११ ॥ १३. द, यत्र न ॥ १४. चौथे श्लोक से श्लोकों की अङ्क गणना में सब हस्तलेखों में भेद है । हमने द को आदर्श माना है । प का इस से इतना ही भेद है कि चौथा अङ्क "सर्वत्र" पर समाप्त होता है । ग में गणना दो दो अर्द्धों को लेकर क्रमशः चली गई है और अन्तिम अर्द्ध श्लोक को भी पहले के समान १० ही माना है ।

१. द, हाशिये पर द्वि के स्थान में ह्रस्व किया गया है ॥ २. प, द, अर्द्ध० । ग, ऽर्द्ध ॥

अर्द्धर्चे द्वे तथा पादे त्रिमात्रं स्यादृगन्तरम् ॥ २ ॥[३]
चाषस्तु वदते मात्रं द्विमात्रं वायसोऽब्रवीत्।
शिखी त्रिमात्रं विज्ञेय एष मात्रा परिग्रहः ॥ ३ ॥[४]
क्वचित्पादविभागेन क्वचिदर्द्धे[५] क्वचित्पदे।
क्वचिदर्थे क्वचिच्छब्दे विरामः पञ्चधा स्मृतः ॥ ४ ॥
छन्दस्येते प्रयुज्यन्ते क्रमेण चेपसंज्ञकाः[६]।
सविरामं प्रयोक्तव्या येन वृत्तिर्न विद्यते[७] ॥ ५ ॥
सञ्ज्ञाने[८] भूयसो दोषान्प्रवक्ष्यामि निबोधत।
स्वरस्य सन्दर्शनमनुस्वार[९] यमावपि ॥ ६ ॥
विच्छिन्नत्वं विक्षणत्वं[१०] सुशीमं सोमसत्सरु[११]।
ईकारेणाव[१२] गृह्णीयात्प्राति शुक्रेति पञ्चमम् ॥ ७ ॥
विश्वानामूष्मसन्देहे अर्द्धर्चे[१३] स्यान्नपुंसकम्।
पुरस्तादुपरिष्टाद्वा सर्वे विश्वा निरूष्मकाः ॥ ८ ॥
वसुधामानि रूपाणि विश्वानि भुवनानि च।
येषां पश्चादुपरिष्टाद्वा सर्वे विश्वा निरूष्मकाः ॥ ९ ॥[१४]
नकारान्ते पदे पूर्वे स्वरे च परसंस्थिते।
ह्रस्वोदात्तः[१५] प्रयोक्तव्यः शषसैः[१६] प्रत्ययेषु च ॥१०॥[१३]

---

३. तु० या० १। १३, १४ ॥ ४. तु० या० १। १७, १८ ॥ ५. ग, ०द्वर्थं। ६. प, द, संज्ञिकाः (?)। ग, संसकाः ॥ ७. ग, दृश्यते ॥ ८. ग, संज्ञाते ॥ ९. का, सन्दर्शनञ्च ह्यनुस्वार ॥ १० ग, विक्षिणत्वं ॥ ११ प, का, सोममत्सरु । १२. ग, इकारेण० ॥ १३. ग, ऽर्द्धर्चे ॥ १४. का, में विलुप्त है ॥ १५. का, ह्रस्वोमात्रः ॥ १६. का, ग, श ष स। द, श ष सः ॥

(१४)

द्वौ तकारौ थकारौ च यमो[१] नेति[१] च पञ्चमः ।
अत्स्ना[२] इति च संयोगमाहुरक्षरचिन्तकाः ॥ १ ॥
ककारान्ते पदे पूर्वे ङकारे[३] प्रत्यये परे ।
ङकारस्यागमं कुर्याद्वाङ्क्म इति निदर्शनम् ॥ २ ॥
टकारान्ते पदे पूर्वे णकारे[३] प्रत्यये परे ।
णकारस्यागमं कुर्याद् वण्महाँ[४] इति निदर्शनम् ॥ ३ ॥
तकारान्ते पदे पूर्वे नकारे[३] प्रत्यये परे ।
नकारस्यागमं कुर्याद् यत्न इति निदर्शनम् ॥ ४ ॥
पकारान्ते[५] पदे पूर्वे मकारे प्रत्यये परे ।
मकारस्यागमं कुर्यात् त्रिष्टुम्म इति निदर्शनम् ॥ ५ ॥
अन्त्यं कटतपं दृष्ट्वा परं ङणनमं तथा ।
आत्मपञ्चमसंयोगमाहु रक्षरचिन्तकाः ॥ ६ ॥
आम्नायात्प्रपदो प्रपदो भवति निर्भयः ।
निर्भयो मधुरो भवति माधुर्यात्सिद्धिमाप्नुयात् ॥ ७ ॥
आम्नायकरणं श्रेष्ठं वर्णानां चावधारणम् ।
अप्रमत्तश्च स्वार्येत एतदाचार्यशासनम् ॥ ८ ॥
आम्नायशास्त्रसम्पन्नं शास्त्रमाम्नायसारवित् ।
पयः शङ्खे यथा तद्वच्छिरः छन्दसि सारथिः ॥ ९ ॥
दन्त्योष्ठकरणं[६] सूक्ष्मं माधुर्यं तरुणं वचः ।

---

१. ग, यमेनेति ॥ २. का, कृत्स्ना । द, अश्ना ॥ ३. ग, मकारे ॥ ४. द, ०महँ ॥ ५. का, मकारान्ते ॥ ६. का, ग, दन्त्योष्ठय ॥

स्वभावं शिक्षुकस्याहुरन्यद्गुरुकृतं[7] भवेत ॥ १० ॥ १४ ॥

(१५)

तरुणं शिक्षुकं[1] प्राहुर्वृद्धमक्षरचिन्तकम्[2] ।
नैयायकं परिश्रुतं बहुधा यन्ति[3] याचकम् ॥ १ ॥

न करालो न लम्बोष्ठो न च सर्वानुनासिकः ।
गद्गदो बद्धजिह्वश्च प्रयोगान्वक्तुमर्हति ॥ २ ॥[4]
प्रकृतिर्यस्य कल्याणी दन्त्योष्ठौ[5] यस्य शोभनौ ।
अधीतं येन तत्वेन स शिक्षां[6] पारयिष्यति ॥ ३ ॥
आगमैरधिकाः केचिद्विज्ञानैरपरेऽधिकाः ।
प्रयोगसौष्ठवादन्ये[7] नाहमस्मीति विस्मयः ॥ ४ ॥
सुतीर्थादागतं जग्धं स्वाम्नातं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजति[8] ॥ ५ ॥[9]
कुतीर्थादागतं दग्धमपर्वर्णैश्च भक्षितम् ।
न तस्य परिमोक्षो ऽस्ति पापाहेरिव किल्विषात्[10] ॥ ६ ॥[11]
येषां तीर्थागता विद्या नित्यमभ्यासनिर्जिता[12] ।
ते भवन्ति दुराधर्षाः ससिंहा[13] इव पर्वताः ॥ ७ ॥

---

७. का, शिक्षकस्य ॥

१. का, शिक्षकं ॥ २. प, वृद्धिम ॥ ३. का, भवन्ति । प, याति ॥ ४, तु० या० १ । २६,२७॥ ना० २ । ८ । १२ ॥ ५. का, ग, दन्तोष्ठौ ॥ ६. ग, विद्यां ॥ ७. द, ग, सौष्टवा० ॥ ८. का, राजते ॥ ९. तु० ना० २ । ८ । ११ ॥ १०. द, ग, किल्बिषात् ॥ ११. तु० ना० २ । ८ । १० ॥ १२. का, ०भ्यासवार्जिता ॥ १३. ग, ससिंह्ला ॥

न भोजनविलम्बी स्यान्न च स्यात् स्त्रीनिबन्धनः१४ ।
स दूरमपि विद्यार्थी व्रजेद्गरुडहंसवत्१५ ॥ ८ ॥१६
हयानामिव जात्यानामर्द्धरात्रार्द्धशायिनाम् ।
न विशेषार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति ॥ ९ ॥१७
अहेरिव जनाद्भीतः स्त्रीभ्यश्च नरकादिव ।
मिष्टान्न१८ विषवद्भीतः स विद्यां पारयिष्यति ॥१०॥१९॥१५

(१६)

सहस्रगुणिता१ विद्या शतशः परिवर्त्तिता२ ।
आगमिष्यति जिह्वाग्रे स्थलान्निम्नमिवोदकम् ॥ १ ॥३
शतेन गुणिता१ भवति४ सहस्रेण तु धारिता ।
शतानां तु सहस्रेण प्रेत्य चेह च तिष्ठति ॥ २ ॥५
उपांशु त्वरितं चैव योऽधीतेऽवत्रसन्निव६ ।
अपि रूपसहस्रैस्तु संशयेष्वेव वर्त्तते ॥ ३ ॥७
येषां च न ग्रहणशक्तिरतिप्रचण्डा,
लुब्धाश्च८ ये न शतशः परिवर्त्तयन्ति ।
निद्रां च ये प्रियसखीमिव न त्यजन्ति९,

---

१४. ग, स्त्रानि० ॥ १५. द, गुरुडासिंहवत । ग, गरुडसिंहवत् ॥ १६. तु० या० २ । ७२ ॥ ना० २ । ८ । २४ ॥ १७. तु० या० २ । ८० ॥ ना० २ । ८ । २३ ॥ १८. ग, मिष्टान्न ॥ १९. तु० या० २ । ७१ ॥ ना० २ । ८ । २५ ॥

१. ग, गणिता ॥ २. का, परिवार्जिता ॥ ३. तु० या० २ । ७५॥ ना० २ । ८ । २२ ॥ ४. ग, विद्या ॥ ५. तु० या० २ । ७६ ॥ ६. प, वृत्तसान्निव । द, वृत्र का विग्र किया गया है । ग, विग्र ॥ ७. तु० या० २ । ६९ ॥ ना० २ । ८ । १८ ॥ ८. का, लुब्धाच ॥

तेऽ९ तादृशा गुरुकुलेषु क्षयं व्रजंति ॥ ४ ॥
पञ्च विद्यां न गृह्णन्ति लुब्धाश्चण्डाश्च ये नराः ।
अलसाश्चातुरोगाश्च१० येषां च विकृतं मनः ॥ ५ ॥११
ऊर्द्ध्वं सहस्रादाम्नातं सततं चान्ववेक्षणम् ।
आप्तैस्तु सह सम्पाठस्त्रिविधा धारणा स्मृता१२ ॥ ६ ॥
यथा खनन् खनित्रेण भूतले१३ वारि विन्दति१४ ।
एवं गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥ ७ ॥१५
योजनानां सहस्रं तु शनैर्याति१६ पिपीलिका ।
आगच्छन्वैनतेयोऽपि१७ पदमेकं न गच्छति ॥ ८ ॥१८
पदेनैकेन१९ मेधावी पदानां विन्दते शतम् ।
मूर्खः पदसहस्रेण पदमेकं न विन्दति ॥ ९ ॥
पदं पादं तथार्द्धर्चं संचितव्यं२० प्रयत्नतः ।
अप्राज्ञः प्राज्ञतां याति सरिद्भिः सागरो यथा ॥ १० ॥
अनिर्वेदी श्रियो२१ मूलं लोहबद्धं२२ च२३ कुण्डलम्२३ ।
अहोरात्राणि दीर्घाणि कः समुद्रं न शोषयेत् ॥ ११ ॥
जलमभ्यासयोगेन शैलानां कुरुते क्षयम् ।

---

९. ग, त्यजन्त्येतादृशा ॥ १०. का, ग, आलसा० ॥ ११. तु० या० २ । ७० ॥ ना० २ । ८ । १४ ॥ १२. प, द, स्मृताः ॥ १३. ग, भूतलं ॥ १४. का, विन्दते ॥ १५. तु० या० २ । ७३ ॥ ना० २ । ८ । २७॥ १६. का, शतै० ॥ १७. प, द, अगच्छन्वै ॥ १८. तु० ना० २ । ८ । १६ ॥ १९. प, पादेनैकेन ॥ २०. का, सेवितव्यं ॥ २१. ग, श्रिया ॥ २२. ग, मोहबद्धं ॥ २३. का, कमण्डलुम् ॥

कर्कशानां मृदुस्पर्शं किमभ्यासो२४ न२४ साधयेत् ।१२।२५
आचार्याः सममिच्छन्ति पदच्छेदन्तु पण्डिताः ।
स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः ॥ १३ ॥२६
आचार्योपासनाद्योगात्तपसा प्राज्ञसेवनात् ।
विगृह्यकथनात्कालात्षड्भिर्विद्या प्रपद्यते ॥ १४ ॥
आलस्यान्मूर्खसंयोगाद्भयाद्रोगनिपीडनात् ।
अत्याशक्याच्च२७ मानाच्च षड्भिर्विद्या विनश्यति ॥ १५ ॥
मण्डूकेन कृतां शिक्षां२८ विदुषां बुद्धिदीपिनीम् ।
यो हि तत्वेन जानाति ब्रह्मलोकं स गच्छतीति२९ ॥१६॥

इति शिक्षा समाप्ता मण्डूककृता ।३०

---

२४. प, ०भ्यासेन ॥ २५. तु० या० २ । ७५ ॥ २६. तु० या० २ । ३०, ३१ ॥ ना० १ । ३ । ३ ॥ २७. का, अत्यशक्त्या च ॥ २८. ग, शीक्षां ॥ २९. का, ब्रह्म० शब्द से अन्त तक दो वार आया है ॥ ३०. प, इति मंडूकी शिक्षा समाप्ता । का, इत्यथर्वणवेदीया माण्डूकी शिक्षा समाप्ता । ग, इत्यथर्ववेदे मंडूकी शीक्षा समाप्तः ॥

परिशिष्ट (क)

मा० या० वा नारद शिक्षाओं की तुलनात्मक

सूची ।

मा०	या०	ना०
१, ४ ॥	१, ५२ ॥	१, ६, २१ ॥
१, ५ ॥	१, ५३ ॥	...
१, ८ ॥	...	१, २, ५ ॥
१, ९ ॥	१, ८ ॥	१, ५, ३ ॥
१, १० ॥	...	१, ५, ४ ॥
१, ११ ॥	...	१, ५, ५ ॥
१, १२ ॥	...	१, ५, ६ ॥
१, १३ ॥	...	१, ४, १ ॥
१, १४ ॥	...	१, ४, २ ॥
२, १ ॥	...	१, ७, ३ ॥
२, २ ॥	...	१, ७, ४ ॥
२, ५ ॥	...	१, ७, १९ ॥
२, ७ ॥	...	१, ६, ५ ॥
२, ९ ॥	१, ४८: ४९ ॥	...
२, ११ ॥	१, ४५ ॥	...
२, १२ ॥	...	१, ६, १२: १३ ॥
३, १ ॥	१, ४६ ॥	...
३, २ ॥	१, २५, २६ ॥	...
३, ३ ॥	१, ३९ ॥	...
३, ४ ॥	१, ४० ॥	...
३, ५ ॥	१, ४२ ॥	...

३, ६ ॥	...	१, ६, १८ ॥
४, १ ॥	१, ३५; ३६ ॥	२, ८, ३; ४ ॥
४, ३ ॥	१, ३७ ॥	२, ८, ५ ॥
४, ७ ॥	२, १०२ ॥	२, ८, ३० ॥
४, ८ ॥	...	२, ८, ३१ ॥
४, ९ ॥	...	२, ८, १५; १७ ॥
४, १० ॥	१, ५४ ॥	...
४, १२ ॥	१, ५८ ॥	...
४, १३ ॥	१, ५९ ॥	...
५, २ ॥	२, २७ ॥	२, ८, ६ ॥
५, ३ ॥	...	२, ३, १ ॥
५, ७ ॥	...	२, ७, ८ ॥
५, ११ ॥	२, २८; २९ ॥	२, ५, १ ॥
६, १ ॥	२, २९ ॥	२, ५, २ ॥
६, २ ॥	२, ८ ॥	...
६, ३ ॥	२, २६ ॥	२, ५, ३ ॥
६, ६ ॥	...	१, ६, १५ ॥
६, ७ ॥	२, ११ ॥	...
७, १ ॥	१, ७१, ७२ ॥	१, ८, ५; १० ॥
७, ३ ॥	१, ७३ ॥	२, १, ३ ॥
७, ४ ॥	१, ७५ ॥	२, १, ६ ॥
७, ५ ॥	१, ७३ ॥	२, १, १ ॥
७, ६ ॥	१, ७४ ॥	२, १, २ ॥
७, ७ ॥	१, ७८ ॥	२, १, ७ ॥
७, ८ ॥	१, ७६ ॥	२, १, ४ ॥
७, ९ ॥	१, ७७ ॥	२, १, ५ ॥
७, १० ॥	१, ७८ ॥	...

८, ७ ॥	२, ५९ ॥	२, २, १६ ॥
९, १ ॥	...	२, ४, १ ॥
९, २ ॥	२, ९ ॥	...
९, ३ ॥	२, ११ ॥	२, ४, २ ॥
९, ६ ॥	२, ७ ॥	१, ६, ११ ॥
९, ७ ॥	...	२, ४, ४ ॥
९, ११ ॥	२, १३ ॥	...
९, १२ ॥	२, १४ ॥	...
९, १३ ॥	२, १५ ॥	...
१०, ४ ॥	२, ५३ ॥	२, ५, ४ ॥
१०, ५ ॥	२, ५४ ॥	२, ५, ९ ॥
१०, ७ ॥	...	२, ४, ५ ॥
१०, ९ ॥	२, ९७ ॥	२, ४, ९ ॥
१०, १० ॥	२, १०१ ॥	२, ४, ८ ॥
११, ५ ॥	२, ११४ ॥	२, २, ९ ॥
११, ६ ॥	२, २२ ॥	२, २, १४ ॥
११, १० ॥	...	२, २, ६ ॥
११, ११ ॥	२, १२२ ॥	२, २, ७ ॥
१२, ९ ॥	...	२, ५, ११ ॥
१३, २ ॥	१, १३; १४ ॥	...
१३, ३ ॥	१, १७; १८ ॥	...
१५, २ ॥	१, २६; २७ ॥	२, ८, १२ ॥
१५, ५ ॥	...	२, ८, ११ ॥
१५, ६ ॥	...	२, ८, १० ॥
१५, ८ ॥	२, ७२ ॥	२, ८, २४ ॥
१५, ९ ॥	२, ८० ॥	२, ८, २३ ॥
१५, १० ॥	२, ७१ ॥	२, ८, २५ ॥

१६, १ ॥
१६, २ ॥
१६, ३ ॥
१६, ५ ॥
१६, ७ ॥
१६, ८ ॥
१६, १२ ॥
१६, १३ ॥

२, ७५ ॥
२, ७६ ॥
२, ६९ ॥
२, ७० ॥
२, ७३ ॥
...
२, ७५ ॥
२, ३०; ३१ ॥

२, ८, २२ ॥
...
२, ८, १८ ॥
२, ८, १४ ॥
२, ८, २७ ॥
२, ८, १६ ॥
...
१, ३, ३ ॥

परिशिष्ट (ख) निदर्शनसूची।

मा० शि०	उदाहरण	अथर्ववेद
७ । ६ ॥	प्रजापतेः	३ । १० । १३ ॥
७ । १० ॥	तनूनपात्	५ । २७ । २ ॥
८ । १ ॥	एजाति	६ । २२ । ३ ॥
८ । १० ॥	अँहोमुचः	*
,,	वातरंहाः	६ । ६२ । १ ॥
,,	दृह्हं	६ । १३६ । २ ॥
८ । ११ ॥	अयं राजा	३ । ४ । ५ ॥
,,	पशोर्मांसम्	अप्राप्त
,,	क्षत्रियाणां धनूँषि	अप्राप्त
६ । १० ॥	शतबालिशा	**
१० । २ ॥	वर्षं	२ । २७ । ६ ॥
,,	बर्हिः	५ । १२ । ४ ॥
१० । ८ ॥	गोमान्	६ । ६८ । ३ ॥
१० । १० ॥	वृष्टमान्	***
१२ । १ ॥	हंसः······	अप्राप्त
१२ । १० ॥	सीता	३ । १७ । ६ ॥
१४ । २ ॥	वाङ्म	१६ । ६० । १ ॥
१४ । ३ ॥	बएमहान्	१३ । २ । २६ ॥
१४ । ४ ॥	यज्ञ	४ । ३ । ७ ॥
१४ । ५ ॥	त्रिष्टुम्भ	अप्राप्त

* अथर्ववेद में अहंः ऽमुचम १६ । ४२ । ४ ॥, वा अहंः ऽमुचे १६ । ४२ । ३ ॥ पाठ है।

** अथर्ववेद में शतवल्शा ६ । ३० । २ ॥ पाठ है।

*** अथर्वपाठ वर्षम् है। अथर्ववेद में वृष्टिमान् ऽइव २० । १३८ । १ ॥ पाठ है।

परिशिष्ट (ग) छान्दसप्रयोग ।

वृत्तीरनुक्रान्ताः	१ । १ ॥
अग्निमारुतयोः	१ । ४ ॥
रम्भान्ति	१ । ६ ॥
उरः शिरोभ्याम्	१ । १२ ॥
पर्वे	२ । १० ॥
आरभेत्	२ । १४ ॥
द्वावेतौ ... भवेत्	३ । २ ॥
नासिकोष्ठौ	६ । ७ ॥
प्रतिषेधते	१२ । १ ॥
दन्त्योष्ठौ	१५ । ३ ॥

श्लोकार्द्धों की प्रतीकसूची।